শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ ত্রিচৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ ত্রিচৎৱারিংশঃ সর্গঃ ॥

## হনুমতা চৈত্যপ্রাসাদস্য ৱিধ্ৱংসস্তদ্রক্ষকাণাং ৱধশ্চ

ততঃ স কিঙ্করান্ হৎৱা হনূমান্ ধ্যানমাস্থিতঃ।
ৱনং ভগ্নং মযা চৈত্যপ্রাসাদো ন ৱিনাশিতঃ॥ **5.43.1** ॥

তস্মাৎ প্রাসাদমপ্যেৱমিমং ৱিধ্ৱংসযাম্যহম্।
ইতি সঞ্চিন্ত্য হনুমান্ মনসাদর্শযন্ বলম্॥ **5.43.2** ॥

চৈত্যপ্রাসাদমুৎপ্লুত্য মেরুশৃঙ্গমিৱোন্নতম্।
আরুরোহ হরিশ্রেষ্ঠো হনূমান্ মারুতাত্মজঃ॥ **5.43.3** ॥

আরুহ্য গিরিসঙ্কাশং প্রাসাদং হরিযূথপঃ।
বভৌ স সুমহাতেজাঃ প্রতিসূর্য ইৱোদিতঃ॥ **5.43.4** ॥

সম্প্রধৃষ্য তু দুর্ধর্ষশ্চৈত্যপ্রাসাদমুন্নতম্।
হনূমান্ প্রজ্ৱলন্ লক্ষ্ম্যা পারিযাত্রোপমোঽভৱৎ॥ **5.43.5** ॥

স ভূৎৱা সুমহাকাযঃ প্রভাৱান্ মারুতাত্মজঃ।
ধৃষ্টমাস্ফোটযামাস লঙ্কাং শব্দেন পূরযন্॥ **5.43.6** ॥

তস্যাস্ফোটিতশব্দেন মহতা শ্রোত্রঘাতিনা।
পেতুর্ৱিহঙ্গমাস্তত্র চৈত্যপালাশ্চ মোহিতাঃ॥ **5.43.7** ॥

অস্ত্রৱিজ্জযতাং রামো লক্ষ্মণশ্চ মহাবলঃ।
রাজা জযতি সুগ্রীৱো রাঘৱেণাভিপালিতঃ॥ **5.43.8** ॥

দাসোঽহং কোসলেন্দ্রস্য রামস্যাক্লিষ্টকর্মণঃ।
হনূমান্ শত্রুসৈন্যানাং নিহন্তা মারুতাত্মজঃ॥ **5.43.9** ॥

ন রাৱণসহস্রং মে যুদ্ধে প্রতিবলং ভৱেৎ।
শিলাভিশ্চ প্রহরতঃ পাদপৈশ্চ সহস্রশঃ॥ **5.43.10** ॥

ধর্ষযিৎৱা পুরীং লঙ্কামভিৱাদ্য চ মৈথিলীম্।
সমৃদ্ধার্থো গমিষ্যামি মিষতাং সর্ৱরক্ষসাম্॥ **5.43.11** ॥

এৱমুক্ত্ৱা মহাকাযশ্চৈত্যস্থো হরিযূথপঃ।
ননাদ ভীমনির্হ্রাদো রক্ষসাং জনযন্ ভযম্॥ **5.43.12** ॥

তেন নাদেন মহতা চৈত্যপালাঃ শতং যযুঃ।
গৃহীৎৱা ৱিৱিধানস্ত্রান্ প্রাসান্ খড্গান্ পরশ্ৱধান্॥ **5.43.13** ॥

ৱিসৃজন্তো মহাকাযা মারুতিং পর্যৱারযন্।
তে গদাভির্ৱিচিত্রাভিঃ পরিঘৈঃ কাঞ্চনাঙ্গদৈঃ॥ **5.43.14** ॥

আজগ্মুর্ৱানরশ্রেষ্ঠং বাণৈশ্চাদিত্যসন্নিভৈঃ।
আৱর্ত ইৱ গঙ্গাযাস্তোযস্য ৱিপুলো মহান্॥ **5.43.15** ॥

পরিক্ষিপ্য হরিশ্রেষ্ঠং স বভৌ রক্ষসাং গণঃ।
ততো ৱাতাত্মজঃ ক্রুদ্ধো ভীমরূপং সমাস্থিতঃ॥ **5.43.16** ॥

প্রাসাদস্য মহাংস্তস্য স্তম্ভং হেমপরিষ্কৃতম্।
উৎপাটযিৎৱা ৱেগেন হনূমান্ মারুতাত্মজঃ॥ **5.43.17** ॥

ততস্তং ভ্রামযামাস শতধারং মহাবলঃ।
তত্র চাগ্নিঃ সমভৱৎ প্রাসাদশ্চাপ্যদহ্যত॥ **5.43.18** ॥

দহ্যমানং ততো দৃষ্টৱা প্রাসাদং হরিযূথপঃ।
স রাক্ষসশতং হৎৱা ৱজ্রেণেন্দ্র ইৱাসুরান্॥ **5.43.19** ॥

অন্তরিক্ষস্থিতঃ শ্রীমানিদং ৱচনমব্রৱীৎ।
মাদৃশানাং সহস্রাণি ৱিসৃষ্টানি মহাত্মনাম্॥ **5.43.20**॥

বলিনাং ৱানরেন্দ্রাণাং সুগ্রীৱৱশৱর্তিনাম্।
অটন্তি ৱসুধাং কৃৎস্নাং ৱযমন্যে চ ৱানরাঃ॥ **5.43.21**॥

দশনাগবলাঃ কেচিৎ কেচিদ্ দশগুণোত্তরাঃ।
কেচিন্নাগসহস্রস্য বভূৱুস্তুল্যৱিক্রমাঃ॥ **5.43.22**॥

সন্তি চৌঘবলাঃ কেচিৎ সন্তি ৱাযুবলোপমাঃ।
অপ্রমেযবলাঃ কেচিৎ তত্রাসন্ হরিযূথপাঃ॥ **5.43.23**॥

ঈদৃগ্বিধৈস্তু হরিভির্ৱৃতো দন্তনখাযুধৈঃ।
শতৈঃ শতসহস্রৈশ্চ কোটিভিশ্চাযুতৈরপি॥ **5.43.24**॥

আগমিষ্যতি সুগ্রীৱঃ সর্ৱেষাং ৱো নিষূদনঃ।
নেযমস্তি পুরী লঙ্কা ন যূযং ন চ রাৱণঃ।
যস্য ৎৱিক্ষ্ৱাকুৱীরেণ বদ্ধং ৱৈরং মহাত্মনা॥ **5.43.25**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে ত্রিচৎৱারিংশঃ সর্গঃ॥